मेण कृतन्तत् सुमहात्मना। कृतकृत्यो भवेद्राजन्नश्वमेधञ्च विन्दति। ततो रामह्रदान् गच्छेत् तीर्थसेवी समाहितः। तत्र रामेण राजेन्द्र! तरसा दीप्ततेजसा। क्षत्रमुत्साद्य वीरेण ह्रदाः पञ्च निवेशिताः। पूरयित्वा नरव्याघ्र! रुधिरेणेति विश्रुतम्। पितरस्तर्पिताः सर्वे तथैव प्रपितामहाः। ततस्ते पितरः प्रीता राममूचुर्नराधिप!। पितर ऊचुः। राम! राम! महाभाग! प्रीताः स्म तव भार्गव!। अनया पितृभक्त्या च विक्रमेण च ते प्रभो!। वरं वृणीष्व भद्रं ते किमिच्छसि महाद्युते। एवमुक्तः स राजेन्द्र! रामः प्रहरतां वरः। अब्रवीत् प्राञ्जलिर्वाक्यं पितॄन् स गगने स्थितान्। भवन्तो यदि मे प्रीता यद्यनुग्राह्यता मयि। पितृप्रसादमिच्छेयं तप आप्यायनं पुनः। यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया। ततश्च पापान्मुच्येयं युष्माकं तेजसाप्यहम्। ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः। एतच्छ्रुत्वा शुभं वाक्यं रामस्य पितरस्तदा। प्रत्यूचुः परमप्रीता रामं हर्षसमन्विताः। तपस्ते वर्द्धतां भूयः पितृभक्त्या विशेषतः। यच्च रोषाभिभूतेन क्षत्रमुत्सादितं त्वया। ततश्च पापान्मुक्तस्त्वं निहतास्ते स्वकर्म्मभिः। ह्रदाश्च तव तीर्थत्वं गमिष्यन्ति न संशयः। ह्रदेष्वेतेषु यः स्नात्वा पितॄन् सन्तर्पयिष्यति। पितरस्तस्य वै प्रीता दास्यन्ति भुवि दुर्लभम्। ईप्सितञ्च मनःकामं स्वर्गलोकञ्च शाश्वतम्। एवं दत्त्वा वरान् राजन्! रामस्य पितरस्तदा। आमन्त्र्य भार्गवं प्रीत्या तत्रैवान्तर्हितास्ततः। एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः। स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुभव्रतः। राममभ्यर्च्य राजेन्द्र! लभेद्बहु सुवर्णकम्। वंशमूलकमासाद्य तीर्थसेवी कुरूद्वह!। स्ववंशमुद्धरेद्राजन्! स्नात्वा वै वंशमूलके। कायशोधनमासाद्य तीर्थं भरतसत्तम!। शरीरशुद्धिः स्नातस्य तस्मिंस्तीर्थे न संशयः। शुद्धदेहश्च संयाति शुभाँल्लोकाननुत्तमान्। ततो गच्छेत धर्म्मज्ञ! तीर्थं त्रैलोक्यविश्रुतम्। लोका यत्रोद्धृताः पूर्वं विष्णुना प्रभविष्णुना। लोकोद्धारं समासाद्य तीर्थं त्रैलोक्यपूजितम्। स्नात्वा तीर्थवरे राजन्! लोकानुद्धरते स्वकान्। श्रीतीर्थञ्च समासाद्य स्नात्वा नियतमानसः। अर्च्चयित्वा पितॄन् देवान् विन्दते श्रियमुत्तमाम्। कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः। तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि। कपिलानां सहस्रस्य फलं विन्दति मानवः। सूर्य्यतीर्थं समासाद्य स्नात्वा नियतमानसः। अर्च्चयित्वा पितॄन् देवानुपवासपरायणः। अग्निष्टोममवाप्नोति सूर्य्यलोकञ्च गच्छति। गवां भवनमासाद्य तीर्थसेवी यथाक्रमम्। तत्राभिषेकं कुर्व्वाणो गोसहस्रफलं लभेत्। शङ्खिनीतीर्थमासाद्य तीर्थसेवी कुरूद्वह!। देव्यास्तीर्थे नरः स्नात्वा लभते वीर्य्यमुत्तमम्। ततो गच्छेत राजेन्द्र! द्वारपालं करन्तुकम्। तच्च तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः। तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत्॥" "धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि" हारा० २देवयजनस्थाने "कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते" शत०ब्रा० ४।१।५।१३। "तेषां कुरुक्षेत्रं देवयजनं यस्मादाहुः कुरुक्षेत्रं देवानां देवयजनं तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगच्छति तदेव मन्यते इदं देवयजनमिति तद्धि देवानां देवयजनम्" शत० ब्रा० १४।१।१।२ अस्मिन् पक्षे च कुरु देवयज्ञाधारभूतं क्षेत्रम् आधारे कर्त्तृत्वोपचारात् कर्त्तरि कुप्रत्यय इति मन्तव्यम्। ३अविमुक्ते क्षेत्रे च। देवयजनपरताऽविमुक्तपरता चास्य "धर्म्मक्षेत्रे कुरुक्षेत्रे" इति गीताव्या० नीलकण्ठेन समर्थिता यथा "तत्र वेदे तेषां कुरुक्षेत्रं देवयजनमासीति" कर्म्मकाण्डप्रसिद्धं कुरुक्षेत्रमन्यत् "अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्म सदनम्" इत्यविमुक्ताख्यं ब्रह्मप्राप्तिस्थानभूतं कुरुक्षेत्रमन्यत् ब्रह्मसदनत्वं चास्य "अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति" वाक्यशेषेण व्युत्पादितम् एतद्व्यावृत्त्यर्थं धर्मक्षेत्रे इति विशेषणं कुरुदेशान्तरगतं हि कुरुक्षेत्रं धर्मक्षेत्रमेव न तु तत् ब्रह्मसदनं प्रवर्ग्यकाण्डे तस्य धर्मक्षेत्रत्वमात्रश्रवणात्"

**कुरुक्षेत्रयोग** पु० एकस्मिन् सायने तिथिनक्षत्रयोगानां क्षयरूपे ज्यो० उक्ते १योगभेदे। २कुरुक्षेत्रे मृत्युसूचके ग्रहयोगभेदे च। "पञ्चग्रहयुते मृत्यौ लग्नसंस्थे बृहस्पतौ। सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" जातकाम्हते योगाध्यायः।

**कुरुजाङ्गल** न० जङ्गलमेव जाङ्गलं कुरुषु जाङ्गलम्। १कुरुक्षेत्रे "तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलम्। कुरुक्षेत्रं स(कुरुः) तपसा पुण्यं चक्रे महातपाः" भा०आ०९४ अ० "यदा परीक्षित् कुरुजाङ्गले वसन्" भाग०१,१६,११, कुरवश्च जाङ्गलाश्च द्व०। "कुरुदेशे जाङ्गलदेशे च पुं भूम्नि "कथमालक्षितः पौरैः